## चिण् भावकर्मणोः। (६६/२७५८)

धातोः परस्य च्लेः चिणादेशो भवति [1]भावे कर्मणि तशब्दे परतः। भावे तावत् — [2]अशायि भवता। कर्मणि खल्वपि — अकारि कटो देवदत्तेन। अहारि भारो [3]यज्ञदत्तेन। चिण्ग्रहणं विस्पष्टार्थम्॥

## सार्वधातुके यक्। (६७/२७५६)

भावकर्मवाचिनि सार्वधातुके परतो [4]धातोः यक् प्रत्ययो भवति। आस्यते भवता। शय्यते भवता। कर्मणि — [5]क्रियते कटः। गम्यते ग्रामः[6]। ककारो गुणवृद्धिप्रतिषेधार्थः। यग्विधाने कर्मकर्तर्युपसङ्ख्यानम्। विप्रतिषेधाद्धि यकः शपो बलीयस्त्वम्। [7]क्रियते कटः स्वयमेव। पच्यते ओदनः स्वयमेव॥

## कर्तरि शप्। (६८/२१६७)

कर्तृवाचिनि सार्वधातुके परतो धातोः शप् प्रत्ययो भवति। पकारः स्वरार्थः (३.१.४/३७०९)। शकारः [8]सार्वधातुकसञ्ज्ञार्थः (३.४.११३/२१६६)। भवति। पचति[9]॥

## दिवादिभ्यः श्यन्। (६९/२५०५)

दिव् इत्येवमादिभ्यः धातुभ्यः श्यन् प्रत्ययो भवति। शपोऽपवादः। नकारः स्वरार्थः (६.१.१९७/३६८६)। शकारः सार्वधातुकार्थः। दीव्यति। सीव्यति[10]॥

## वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। (७०/२३२१)

उभयत्रविभाषेयम्। 'टुभ्राशृ, टुभ्लाशृ दीप्तौ' (धा.पा. ८२५,८२६), 'भ्रमु अनवस्थाने' (धा. पा. १२०६), 'भ्रमु चलने' (धा.पा. ८५१), द्वयोरपि ग्रहणम्, 'क्रमु पादविक्षेपे' (धा. पा. ४७३), 'क्लमु ग्लानौ' (धा.पा. १२०८), 'त्रसी उद्वेगे' (धा.पा. १११८), 'त्रुटी छेदने' (धा.पा. १३७६), लष कान्तौ' (धा.पा. ८८९), एतेभ्यो [11]वा श्यन् प्रत्ययो भवति। भ्राश्यते, भ्राशते। भ्लाश्यते, भ्लाशते। भ्राम्यति, भ्रमति[12]। क्राम्यति, क्रामति। क्लाम्यति, क्लामति। त्रस्यति, त्रसति। त्रुट्यति, त्रुटति। लष्यति, लषति॥

## यसोऽनुपसर्गात्। (७१/२५२१)

'[13]यसु प्रयत्ने' (धा.पा. १२११) दैवादिकः। [14]तस्मान् नित्यं श्यनि प्राप्तेऽनुपसर्गाद् [15]विकल्प उच्यते। यसोऽनुपसर्गाद् वा श्यन् प्रत्ययो भवति। यस्यति, यसति। अनुपसर्गात् इति किम्? आयस्यति। प्रयस्यति॥

---

1. तशब्दे परतो भावकर्मणोरर्थयोः ड, भावकर्मवाचिनि ह. 2. आसि ह. 3. देवदत्तेन ड. ह. 4. धातोः नास्ति ह. 5. पच्यते ओदनो भवता अ. 6. भवता इत्यधिकम् अ. 7. वाक्यमिदं नास्ति अ.क.ह. 8. सार्वधातुकार्थः ब.इ.फ. 9. नयति इत्यधिकम् ड. 10. सीव्यतः सीव्यन्ति इत्यधिकम् ग. 11. धातुभ्यः इत्यधिकम् अ. 12. भ्रम्यति इत्यधिकम् अ.ब, भौवादिकोऽपि भ्रमतिरस्ति इत्यधिकम् ड. 13. यस ह. 14. ततः ग. 15. विकल्प्यते ह.